শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৪১

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৪১

*পূতনাশরীরদাহৱর্ণনম,*
*গোপীনাং বালাললনকৌতুকৱর্ণনম্ চ*

ৱ্ৰজেশ্বরঃ শৌরিৱচো নিশম্য
সমাৱ্ৰজন্নধ্ৱনি ভীতচেতাঃ।
নিষ্পিষ্টনিশশেষতরুং নিরীক্ষ্য
কঞ্চিতপদার্থং শরণং গতস্ত্ৱাম্॥ ১ ॥

নিশম্য গোপীৱচনাদুদন্তং
সৰ্ৱেপি গোপা ভযৱিস্ময়ান্ধাঃ।
ত্ৱতপাতিতং ঘোরপিশাচদেহং
দেহুর্ৱিদূরেথ কুঠারকৃত্তম্॥ ২ ॥

ত্ৱতপীতপূতস্তনতচ্ছরীরাত
সমুচ্চলন্নুচ্চতরো হি ধূমঃ।
শঙকামধাদাগরৱঃ কিমেষ
কিং চান্দনো গৌল্গুলৱোথৱেতি॥ ৩ ॥

মদঙগসঙগস্য ফলং ন দূরে
ক্ষণেন তাৱত্ ভৱতামপি স্যাত্।
ইত্যুল্লপন্ ৱল্লৱতল্লজেভ্যঃ
ত্ৱং পূতনামাতনুথাঃ সুগন্ধিম্॥ ৪ ॥

চিত্রং পিশাচ্যা ন হতঃ কুমারঃ
চিত্রং পুরৈৱাকথি শৌরিণেদম্।
ইতি প্রশংসন্ কিল গোপলোকো
ভৱন্মুখালোকরসে ন্যমাঙক্ষীত্॥ ৫ ॥

দিনে দিনেথ প্রতিবৃদ্ধলক্ষ্মী-
রক্ষীণমাঙগল্যশতো ব্রজোযম্।
ভৱন্নিৱাসাদযি ৱাসুদেৱ
প্রমোদসান্দ্রঃ পরিতো ৱিরেজে॥ ৬ ॥

গৃহেষু তে কোমলরূপহাস-
মিথঃ কথাসঙকুলিতাঃ কমন্যঃ।
ৱৃত্তেষু কৃত্যেষু ভৱন্নিরীক্ষা-
সমাগতাঃ প্রত্যহমত্যনন্দন্॥ ৭ ॥

অহো কুমারো মযি দত্তদৃষ্টিঃ
স্মিতং কৃতং মাং প্রতি ৱতসকেন।
এহ্যেহি মামিত্যুপসার্য পাণী
ত্বযীশ কিং কিং ন কৃতং ৱধূভিঃ॥ ৮ ॥

ভৱদ্বপুঃ স্পর্শনকৌতুকেন
করাতকরং গোপৱধূজনেন।
নীতস্তৱমাতাম্রসরোজমালা-
ৱ্যালম্বিলোলম্বতুলামলাসীঃ॥ ৯ ॥

নিপাযযন্তী স্তনমঙকগং ত্বাং
ৱিলোকযন্তী ৱদনং হসন্তী।
দশাং যশোদা কতমান্ন ভেজে
স তাদৃশঃ পাহি হরে গদান্মাম্॥ ১০ ॥

**********

www.prapatti.com